आकाशवाणी

दिनाङ्क :- 05.02.2026 प्रात: - 06:55

## गोयलःभारत-अमेरिका-सन्धिः

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष-गोयलः अवदत् यत् ऐतिहासिकः भारत-अमेरिका-व्यापार-सन्धिः द्वयोः देशयोः मध्ये सम्बन्धान् सुदृढं कर्तुं, सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षपर्यन्तं राष्ट्रं विकसितभारतं कर्तुं भारतस्य यात्रां अग्रे नेतुं च महत्त्वपूर्णः पदाक्षेपो वर्त्तते। लोकसभायां ह्यः प्रवदन् श्री गोयलः अवदत् यत्, अस्मिन् व्यापारसमन्वये, भारतं संवेदनशीलक्षेत्रेषु विशेषतः कृषि-दुग्ध-क्षेत्रयोः च स्वहितानां रक्षणे सफलतया समर्थः अभवत्। व्यापार-व्यवहारस्य लाभविषये श्रीगोयलः अवदत् यत्, संधिना लघु-मध्यम-उद्यमानां, एम. एस. एम. ई. इत्येतेषां, कुशल-कर्मचारिणां, उद्योगानां च कृते नूतनाः अवसराः उद्घाटिताः भविष्यन्ति।

## राष्ट्रपति धन्यवाद प्रस्ताव

विपक्षस्य कोलाहल पूर्णे वातावरणे राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावस्य विषये संसदः उभयोः सदनयोः चर्चा अभवत्। लोकसभायाः कार्याचरणं ह्यः निरन्तरं तृतीयदिवसेपि बाधितम्। अमेरिका-भारत-व्यापार-सन्धि विषये, चीनदेशेन सह सीमा-विवादस्य विषये च विपक्षि दलानि सर्वकारस्य विरुद्धं उद्घोषं कृतवन्तः। लोकसभायां त्रीणि स्थगनानि दृष्टानि, अन्ततो गत्वा दिवस-पर्यन्ताय सदनं स्थगितम्। राज्यसभायां केन्द्रीयमन्त्री तथा सभाध्यक्षः जे. पी. नड्डाः चर्चायाम् अवदत् यत् राष्ट्रपतेः अभिभाषणे भारतस्य विकासगाथा अभिलिखिता तथा च तत् अत्यन्तं प्रेरकम् आसीत् इति। चर्चायां भागं स्वीकृत्य राज्यसभायां विपक्षस्य नेता मल्लिकार्जुन खर्गे इत्यनेन आरोपितं यत् मोदी-प्रशासनावधौ सामाजिक-न्यायः सौहार्दः च क्षिणौ अभवताम्।

## भारत-टैक्सी

केन्द्रीय-सहकारिता-मन्त्री अमितशाहः अद्य नवदिल्ल्यां भारतस्य प्रथमस्य सहकारिता-आधारितस्य राईड-हेलडिंग-मञ्चस्य भारत-टैक्सी इत्यस्य उद्घाटनम् करिष्यति। सहकारिता-मन्त्रालयेन उक्तं यत् एतत् मञ्चं सारथि इति नाम्ना निर्दिष्टानां चालकानां स्वामित्वं, परिचालनं, मूल्य-निर्माणं च केन्द्रे स्थापयिष्यति तथा च तान् शोषक-समुच्चय-आधारित-प्रतिमानात् मुक्तिं प्रदाष्यति।

## नितिन नबीनः

भाजपेति दलाध्यक्षः नितिन नबीनः अवदत् यत् मुख्यमन्त्री रेवन्त रेड्डी इत्यस्य नेतृत्वे तेलङ्गाना-काङ्ग्रेस्-सर्वकारः विभाजन-राजनीतिं तुष्टिकरणं च कुर्वन् राज्यस्य हिन्दु-मन्दिराणि परम्पराः च लक्ष्यीकरोति। तेलङ्गाना-राज्यस्य महबूबनगरे ह्यः जनसभां सम्बोधयन् श्रीनबीनः अवदत् यत् भाजपेति दलं सनातनधर्मस्य, हिन्दूजनानां भावानां रक्षणाय च प्रतिज्ञां करोति इति, काङ्ग्रेस्-दलस्य कार्याणां परिणामाः शीघ्रमेव आगमिष्यन्ति इति सावधानम् कृतवान्। तेलङ्गाना-राज्ये सुशासनस्य विकासस्य च आवश्यकतां अवलम्ब्य, भाजपा-प्रमुखः अवदत् यत् आगामि नगरपालिका-निर्वाचने विजयं प्राप्तुं दलस्य लक्ष्यम् अस्ति।

## मणिपुर-राज्ये राष्ट्रपतिशासनं निरस्तम्

मणिपुर-राज्ये राष्ट्रपतिशासनं निरस्तम् अभवत् तथा च भाजपेति दलस्य विधायकः युमनाम खेमचन्दसिङ्घः मणिपुरस्य मुख्यमन्त्रीरूपेण शपथग्रहणं कृतवान्। गृहमन्त्रालयेन ह्यः मणिपुरराज्ये राष्ट्रपतिशासनस्य तत्क्षणप्रभावस्य निरसनस्य घोषणा कृता। तत्कालीनमुख्यमन्त्रिणः एन्. बीरेन् सिङ्घस्य त्यागपत्रस्य अनन्तरं पञ्चविंशत्यधिक-द्विसहस्रतम वर्षस्य फरवरी मासस्य त्रयोदश दिनाङ्के राज्ये राष्ट्रपतिशासनं प्रावर्त्यत। अत्रान्तरे मणिपुरविधानसभा सचिवालयेन सूचितं यत् प्रवर्तमानस्य द्वादश-तमस्य मणिपुरविधानसभायाः सप्तमं सत्रं श्वः भविष्यति।

## अण्डर्-19 क्रिकेट्

आई. सी. सी. पुरुषाणां अण्डर्-19 क्रिकेट्-विश्वचषक-क्रीडायां जिम्बाब्वे-देशे भारत-अफगानिस्तान्-देशयोः मध्ये गतसायं जातायां उपान्त्यचक्रीय-क्रीड ायां भारतेन् अफगानिस्तान दलमं सप्तस्तोभैः पराजित्य निर्णायक द्वंद्वे प्रविष्टम्।

।। इति वार्ताः।।